ದೈವರಾತೀಯ

ಬ್ರಹ್ಮ ಸೂತ್ರಮ್

॥ ॐ श्रीः

॥ ॐ भद्रं नो अपिवातय मनः ॥

॥ अथ ब्रह्मसूत्रम् ॥

(१) (प्रथमं ब्रह्मजिज्ञासाधिकरणम् ॥)

॥ अथातो ब्रह्मजिज्ञासा ॥ १ ॥

(२) (जन्माद्यधिकरणम् ॥)

जन्माद्यस्य यतः ॥ २ ॥

(३) (शास्त्रयोनित्वाधिकरणम् ॥)

शास्त्रयोनित्वात् ॥ ३ ॥

(४) (समन्वयाधिकरणम् ॥)

तत्तु समन्वयात् ॥ ४ ॥

(५) (ईक्षत्यधिकरणम् ॥)

ईक्षतेर्नाशब्दम् ॥ ५ ॥

गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

हेयत्वावचनाच्च ॥ ८ ॥

स्वाप्ययात् ॥ ९ ॥

गतिसामान्यात् ॥ १० ॥

श्रुतत्वाच्च ॥ ११ ॥

(६) (आनन्दमयाधिकरणम् ॥)

" आनन्दमयोऽभ्यासात् ॥१२॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥१३॥

तद्धेतुव्यपदेशाच्च ॥१४॥

मान्त्रवर्णिकमेव च गीयते ॥१५॥

नेतरोऽनुपपत्तेः ॥१६॥

भेदव्यपदेशाच्च ॥१७॥

कामाच्च नानुमानापेक्षा ॥१८॥

अस्मिन्नस्य च तद्योगं शास्ति ॥१९॥

(७) (अन्तरधिकरणम् ॥)

" अन्तस्तद्धर्मोपदेशात् ॥२०॥

भेदव्यपदेशाच्चान्यः ॥२१॥

(८) (आकाशाधिकरणम् ॥)

" आकाशस्तल्लिङ्गात् ॥२२॥

(९) (प्राणाधिकरणम् ॥)

" अत एव प्राणः ॥२३॥

(१०) (ज्योतिश्चरणाधिकरणम् ॥)

" ज्योतिश्चरणाभिधानात् ॥२४॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्-

तथा हि दर्शनम् ॥२५॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥२६॥

उपदेशभेदान्नेति चेन्न - उभयस्मिन्नप्यविरोधात् ॥

॥२७॥

(११) (प्रतर्दनाधिकरणम् ॥)

" प्राणस्तथाऽनुगमात् ॥२८॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥

॥२९॥

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥३०॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्न- उपासात्रैविध्याद्-

आश्रितत्वादिह तद्योगात् ॥३१॥

॥ इति ब्रह्मसूत्रे प्रथमाध्याये प्रथमः पादः ॥

॥अथ प्रथमाध्याये द्वितीयः पादः ॥

(१) (सर्वत्र प्रसिध्यधिकरणम् ॥)

" सर्वत्र प्रसिद्धोपदेशात् ॥१॥

विवक्षितगुणोपपत्तेश्च ॥२॥

अनुपपत्तेस्तु न शारीरः ॥३॥

कर्मकर्तृव्यपदेशाच्च ॥४॥

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वाद्-एवं व्योमवच्च ॥ ७ ॥

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

(२) (अत्त्रधिकरणम् ॥)

" अत्ता चराचरग्रहणात् ॥ ९ ॥

प्रकरणाच्च ॥ १० ॥

(३) (गुहां प्रविष्टाधिकरणम् ॥)

" गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

विशेषणाच्च ॥ १२ ॥

(४) (अन्तरधिकरणम् ॥)

" अन्तर उपपत्तेः ॥ १३ ॥

स्थानादिव्यपदेशाच्च ॥ १४ ॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

अनवस्थितेरसम्भवाच्च नेतरः ॥ १७ ॥

(५) (अन्तर्याम्यधिकरणम् ॥)

" अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

न च स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

(६) (अदृश्यत्वाद्यधिकरणम् ॥)

" अदृश्यत्वादिगुणको धर्मोक्तेः ॥२१॥

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥२२॥

रूपोपन्यासाच्च ॥२३॥

(७) (वैश्वानराधिकरणम् ॥)

" वैश्वानरः साधारणशब्दात् ॥२४॥

स्मर्यमाणमनुमानं स्यादिति ॥२५॥

शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशात्-

असम्भवात् पुरुषमपि चैनमधीयते ॥२६॥

अत एव न देवता भूतं च ॥२७॥

साक्षादप्यविरोधं जैमिनिः ॥२८॥

अभिव्यक्तेरित्याश्मरथ्यः ॥२९॥

अनुस्मृतेर्बादरिः ॥३०॥

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥३१॥

आमनन्ति चैनमस्मिन् ॥३२॥

॥ इति प्रथमाध्याये द्वितीयः पादः ॥